# संभाषणांशानुपयुज्य आरोग्यसंरक्षणविषये टिप्पणीं लिखतु।

बालः - नमस्ते।

वैद्यः - नमस्ते। आगच्छ...। केन हेतुना अस्वस्थ इव लक्ष्यते?

बालः - शरीरस्य स्वास्थ्यं नास्ति ।

वैद्यः - सुखदुःखयोः आयतनं शरीरमेव। स्वस्य कर्मणः फलं स्वयमेव अनुभूयते।

बालः - परिपाकं सम्यक् नास्ति। किं करणीयम्?

वैद्यः - भोजनावसरे ईर्ष्यादिभावनां विहाय स्वस्थः भवेत्। अनेन भुक्तानां पचनं सम्यक् भवेत्

बालः - तुष्टिः कथम् आप्नुयात्?

वैद्यः - कृतकृत्येषु सामर्थ्यं, धनेषु कीर्तिसम्पादनं, लाभेषु स्वास्थ्यं, सुखेषु तृप्तिः च आप्तव्यम्।

बालः - अन्यस्य वैद्यस्य आवश्यकता अस्ति वा ?

वैद्यः - परिश्रमः मिताहारः च भूगतौ अश्विनीसुतौ भवतः।
जनाः एतत् द्वयम् अनुशीलयन्ति चेत् अन्यस्य वैद्यस्य आवश्यकता नास्ति।

बालाः - धन्यवादः।